# देवीभुजंग स्तोत्रम्

विरिञ्च्यादिभिः पञ्चभि र्लोकपालैः समूढे महानन्दपीठे निषण्णम् ।
धनुर्बाण पाशाङ्कुश प्रोतहस्तं महस्त्रैपुरं शंकराद्वैत मव्यात् ॥ १॥

यदन्नादिभिः पञ्चभिः कोशजालैः शिरःपक्ष पुच्छात्मकै रन्तरन्तः ।
निगूढे महायोगपीठे निषण्णं पुरारे रथान्तःपुरं नौमि नित्यम् ॥ २॥

विरिञ्चादि रूपैः प्रपञ्चे विहृत्य स्वतन्त्रा यदा स्वात्म विश्रान्तिरेषा ।
तदा मानमातृ प्रमेयातिरिक्तं परानन्दमीडे भवानि त्वदीयम् ॥ ३॥

विनोदाय चैतन्यमेकं विभज्य द्विधा देवि जीवः शिवश्चेति नाम्ना ।
शिवस्यापि जीवत्व मापादयन्ती पुनर्जीवमेनं शिवं वा करोषि ॥ ४॥

समाकुञ्च्य मूलं हृदि न्यस्य वायुं मनो भ्रूबिलं प्रापयित्वा निवृत्ताः ।
ततः सच्चिदानन्द रूपे पदे ते भवन्त्यम्ब जीवाः शिवत्वेन केचित् ॥ ५॥

शरीरेऽतिकष्टे रिपौ पुत्रवर्गे सदाभीति मूले कलत्रे धने वा ।
न कश्चिद्विरज्यत्यहो देवि चित्रं कथं त्वत्कटाक्षं विना तत्त्वबोधः ॥ ६॥

शरीरे धनेऽपत्यवर्गे कलत्रे विरक्तस्य सद्देशिकादिष्ट बुद्धेः ।
यदाकस्मिकं ज्योतिरानन्द रूपं समाधौ भवेत्तत्त्वम स्यम्ब सत्यम् ॥ ७॥

मृषान्यो मृषान्यः परो मिश्रमेनं परः प्राकृतं चापरो बुद्धि मात्रम् ।
प्रपञ्चं मिमीते मुनीनां गणोऽयं तदेतत्त्व मेवेति न त्वां जहीमः ॥ ८॥

निवृत्तिः प्रतिष्ठा च विद्या च शान्ति- स्तथा शान्त्यतीतेति पञ्चीकृताभिः ।
कलाभिः परे पञ्चविंशात्मिकाभि- स्त्वमेकैव सेव्या शिवाभिन्नरूपा ॥ ९॥

अगाधेऽत्र संसारपङ्के निमग्नं कलत्रादि भारेण खिन्नं नितान्तम् ।
महामोह पाशौघबद्धं चिरान्मां समुद्धर्तु मम्ब त्वमेकैव शक्ता ॥ १०॥

समारभ्य मूलं गतो ब्रह्मचक्रं भवद्दिव्य चक्रेश्वरी धाम भाजः ।
महासिद्धि संघात कल्पद्रुमाभा- नवाप्याम्ब नादानुपास्ते च योगी ॥ ११॥

गणेशै र्ग्रहैरम्ब नक्षत्र पङ्क्त्या तथा योगिनी राशिपीठै रभिन्नम् ।
महाकालमात्मान मामृश्य लोकं विधत्से कृतिं वा स्थितिं वा महेशि ॥ १२॥

लसत्तार हारा मतिस्वच्छचेलां वहन्तीं करे पुस्तकं चाक्षमालाम् ।
शरच्चन्द्रकोटिप्रभा भासुरां त्वां सकृद्भावय न्भारती वल्लभः स्यात् ॥ १३॥

समुद्यत्सहस्रार्क बिम्बाभ वक्त्रां स्वभासैव सिन्दूरि ताजाण्ड कोटिम् ।
धनुर्बाण पाशाङ्कुशा न्धारयन्तीं स्मरन्तः स्मरं वापि संमोहयेयुः ॥ १४॥

मणिस्यूत ताटङ्क शोणास्य बिम्बां हरित्पट्टवस्त्रां त्वगुल्लासि भूषाम् ।
हृदा भावयंस्तप्त हेमप्रभां त्वां श्रियो नाशयत्यम्ब चाञ्चल्यभावम् ॥ १५॥

महामन्त्र राजान्त बीजं पराख्यं स्वतो न्यस्तबिन्दु स्वयं न्यस्तहार्दम् ।
भवद्वक्त्र वक्षोज गुह्याभिधानं स्वरूपं सकृद्भावयेत्स त्वमेव ॥ १६॥

तथान्ये विकल्पेषु निर्विण्ण चित्ता- स्तदेकं समाधाय बिन्दुत्रयं ते ।
परानन्द संधान सिन्धौ निमग्नाः पुनर्गर्भरन्ध्रं न पश्यन्ति धीराः ॥ १७॥

त्वदुन्मेष लीलानुबन्धाधिकारा- न्विरिञ्च्यादि कांस्त्वद्गुणाम्भोधि बिन्दून् ।
भजन्त स्तितीर्षन्ति संसारसिन्धुं शिवे तावकीना सुसंभावनेयम् ॥ १८॥

कदा वा भवत्पाद पोतेन तूर्णं भवाम्भोधि मुक्तीर्य पूर्णान्तरङ्गः ।
निमज्जन्तमेनं दुराशाविषाब्धौ समालोक्य लोकं कथं पर्युदास्से ॥ १९॥

कदावा हृषीकाणि साम्यं भजेयुः कदा वा न शत्रुर्न मित्रं भवानि ।

कदा वा दुराशाविषूची विलोपः कदा वा मनो मे  समूलं विनश्येत्  ॥ २०॥

नमोवाक माशास्महे देवि युष्म- त्पदाम्भोज युग्माय तिग्माय गौरि ।
विरिञ्च्यादि भास्वत्किरीट प्रतोली- प्रदीपायमान प्रभा भास्वराय ॥ २१॥

कचे चन्द्ररेखं कुचे तारहारं करे स्वादुचापं शरे षट्पदौघम् ।
स्मरामि स्मरारे रभिप्राय मेकं मदाघूर्णनेत्रं मदीयं निधानम् ॥ २२॥

शरेष्वेव नासा धनुष्वेव जिह्वा जपापाटले लोचने ते स्वरूपे ।
त्वगेषा भवच्चन्द्र खण्डे  श्रवो मे गुणे ते मनोवृत्तिरम्ब त्वयि स्यात्  ॥ २३॥

जगत्कर्म धीरान्वचोधूत कीरान् कुचन्यस्त हारान्कृपा सिन्धु पूरान् ।
भवाम्भोधि पारान्महापाप दूरान् भजे वेदसाराञ्शिवप्रेम दारान् ॥ २४॥

सुधासिन्धुसारे चिदानन्द नीरे समुत्फुल्ल नीपे सुरत्रान्तरीपे ।
मणिव्यूहसाले स्थिते हैमशाले मनोजारिवामे निषण्णं मनो मे ॥ २५॥

दृगन्ते विलोला सुगन्धीषु माला प्रपञ्चेन्द्रजाला विपत्सिन्धुकूला ।
मुनिस्वान्तशाला नमल्लोकपाला हृदि प्रेमलोला मृतस्वादु लीला ॥ २६॥

जगज्जाल मेतत्त्वयै वाम्ब सृष्टं त्वमेवाद्य यासीन्द्रियै रर्थजालम् ।
त्ववेकैव कर्त्री त्वमेकैव भोक्त्री न मे पुण्यपापे न मे बन्धमोक्षौ ॥ २७॥

इति प्रेमभारेण किञ्चिन्मयोक्तं न बुध्वैव तत्त्वं मदीयं त्वदीयं ।
विनोदाय बालस्य मौर्ख्यं हि मात- स्तदेतत्प्रलाप स्तुतिं मे गृहाण ॥ २८॥

इति श्रीमच्छंकर भगवतः कृतौ देवीभुजंग स्तोत्रं सम्पूर्णम् ॥